# vishvakarmastotram

# વિશ્વકર્મસ્તોત્રમ્

## Document Information

Text title : vishvakarmastotram

File name : vishvakarmastotram.itx

Category : deities_misc

Location : doc_deities_misc

Proofread by : PSA Easwaran psaeaswaram at gmail.com

Latest update : July 8, 2017

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 3, 2025

*sanskritdocuments.org*

# વિશ્વકર્મસ્તોત્રમ્

વિશ્વકર્મ ધ્યાનમ્ ।
ન ભૂમિર્ન જલઞ્ચૈવ ન તેજો ન ચ વાયવઃ
નાકાશં ચ ન ચિત્તઞ્ચ ન બુધ્દીન્દ્રિયગોચરાઃ
ન ચ બ્રહ્મા ન વિષ્ણુશ્ચ ન રુદ્રશ્ચ તારકાઃ
સર્વશૂન્યા નિરાલમ્બા સ્વયમ્ભૂતા વિરાટસત્
સદાપરાત્મા વિશ્વાત્મા વિશ્વકર્મા સદાશિવઃ ॥

શ્રિતમધ્યતમધ્યસ્તં બ્રહ્માદિસુરસેવિતમ્ ।
લોકાધ્યક્ષં ભજેઽહં ત્વાં વિશ્વકર્માણમવ્યયમ્ ॥

પ્રાકાદિદિઙ્મુખોત્પન્નો સનકશ્ચ સનાતનઃ ।
અભુવનસ્ય પ્રત્નસ્ય સુપર્ણસ્ય નમામ્યહમ્ ॥

અખિલભુવનબીજકારણમ્ ।
પ્રણવતત્ત્વં પ્રણવમયં નમામિ ॥

પઞ્ચવક્ત્રં જટાધરં પઞ્ચદશવિલોચનમ્ ।
સદ્યોજાતાનનં શ્વેતં ચ વામદેવન્તુ કૃષ્ણકમ્ ॥

અઘોરં રક્તવર્ણં ચ તત્પુરુષં હરિતપ્રભમ્ ।
ઈશાનં પીતવર્ણં ચ શરીરં હેમવર્ણકમ્ ॥

દશબાહું મહાકાયં કર્ણકુણ્ડલશોભિતમ્ ।
પીતામ્બરં પુષ્પમાલં નાગયજ્ઞોપવીતિનમ્ ॥

રુદ્રાક્ષમાલાસંયુક્તં વ્યાઘ્રચર્મોત્તરીયકમ્ ।
પિનાકમક્ષમાલાઞ્ચ નાગશૂલવરામ્બુજમ્ ॥

વીણાં ડમરુકં બાણં શઙ્ખચક્રધરં તથા ।
કોટિસૂર્યપ્રતીકાશં સર્વજીવદયાપરમ્ ॥

વિશ્વેશં વિશ્વકર્માણં વિશ્વનિર્માણકારિણમ્ ।
ઋષિભિઃ સનકાદ્યૈશ્ચ સંયુક્તં પ્રણમામ્યહમ્ ॥

ઇતિ વિશ્વકર્મસ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by PSA Easwaran

*vishvakarmastotram*

pdf was typeset on March 3, 2025

Please send corrections to *sanskrit@cheerful.com*